QP CODE: 26019405

26019405

Reg No : ....................

Name : ....................

# MA DEGREE ( CSS) EXAMINATION, MARCH 2026

## Fourth Semester

M A SANSKRIT SPECIAL (VEDANTA) - REVISED

## Core Courses - SA040401 - VEDANTA 6

2019 Admission Onwards

613C1DDE

Time: 3 Hours | Weightage: 30

**Part A (Short Answer Questions)**

*Answer any **eight** questions.*

*Weight **1** each.*

1. सत्यज्ञानसुखात्मकः इति पदस्य तात्पर्यं लिखत।
2. अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वं समर्थयत।
3. अद्वैतसिद्धौ प्रोक्तानि पञ्च मिथ्यात्वलक्षणानि लिखत।
4. गुणादिकं गुण्यादिना भिन्नाभिन्नम् इत्यत्र तार्किकाद्यङ्गीकृतं भिन्नत्वं प्रदर्शयत।
5. द्वितीयमिथ्यात्वलक्षणं विलिख्य लक्षणसमन्वयं दृष्टान्ते प्रदर्शयत।
6. निषेधस्य बाध्यत्वं न पारमार्थिकसत्त्वाविरोधित्वे न तन्त्रम् – स्पष्टयत।
7. तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वा शब्दः स्पष्टयत।
8. ‘शुक्तिरियं न रजत’मित्यत्र बाधोत्तरकालं प्रातीतिकरजतानुवृत्तिः कुतो न स्यात्?
9. ‘सह कार्येण नासीदिति लीनेन कार्येण सह निवृत्यभिप्रायम्’ – सप्रसङ्गं व्याख्यात।
10. ‘प्रमाणसिद्धत्वं चाबाध्यत्वमित्यन्यत् ‘– व्याख्यात।

(8×1=8 weightage)

**Part B (Short Essay/Problems)**

*Answer any **six** questions.*

*Weight **2** each.*

11. ब्रह्मज्ञानेतराबाध्यत्वमति पदस्य विप्रतिपत्तिवाक्ये किं प्रयोजनमिति विशदयत।
12. प्रथमलक्षणे पूर्वपक्षोक्तं व्याघातं सिद्धान्ते कथं निराकृतमिति प्रदर्शयत।

13. "न च तत्र लौकिकपरमार्थरजतमेव स्वरूपेण निषेधप्रतोयोगीति वाच्यम् –भ्रमबाधयोः वैयधिकरण्यापत्तेः अप्रसक्तप्रतिषेधापत्तेश्च"। सविशदं प्रतिपादयत।

14. शून्यवादिभिः सदधिकरणकभ्रमानङ्गीकारेण क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपासद्वैलक्षण्यस्य शुक्तिरूप्ये प्रपञ्चे चानङ्गीकारात् –स्पष्टयत।

15. अव्याप्यवृत्तिषु सिद्धसाधनतादोषं प्रदर्श्य परिहरत।

16. ज्ञाननिवर्त्यत्वं मिथ्यत्वमित्यत्र आशङ्कितदोषाः सिद्धान्तिना कथं निराक्रियन्ते इति प्रदर्शयत।

17. तत्त्वप्रदीपाकारेणोक्तं मिथ्यात्वलक्षणमधीतग्रन्थदिशा निरूपयत।

18. अस्ति च प्रपञ्चतन्मिथ्यात्वयोः एकब्रह्मज्ञानबाध्यत्वम् – सविशदं प्रतिपादयत।

(6×2=12 weightage)

**Part C (Essay Type Questions)**

*Answer any **two** questions.*

*Weight **5** each.*

19. विप्रतिपत्तेः प्रदर्शनीयतां यथाग्रन्थं निरूपयत।

20. निर्धर्मके ब्रह्मणि सत्यत्वादिश्रुतीनामुपपत्तिं प्रदर्शयत।

21. अद्वैतसिद्धौ प्रोक्तं तृतीयमिथ्यात्वलक्षणे पूर्वपक्षोन्नीतदोषान् यथग्रन्थं विशदयत।

22. मिथ्यात्वस्य मिथ्यात्वे जगत्सत्यत्वमाशङ्क्य यथाग्रन्थं परिहरत।

(2×5=10 weightage)